( शशिनः कला । चन्द्रकला । यथा,—
"कमलिनी मलिनी दिवसात्यये
शशिकला विकला चणदाचये ।
इति विधिर्विदधे प्रमदासुखम्
भवति विश्वतमः क्रमशो जनः ॥"
इत्युद्भटः ॥ )

शशिकान्तं, क्ली, (शशी कान्तो यस्य ।) कुमुदम् । इति राजनिर्घण्टः ॥

शशिकान्तः, पुं, (शशी कान्तो यस्य ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥ यथा, वृहत्संहितायाम् । ८० । ४ ।
"वैदूर्य्यविपुलकविमलक-
राजमणिस्फटिकशशिकान्ताः ॥")

शशिध्वजः, पुं, ( शशी ध्वजे यस्य । ) भल्लाटपुरराजः । यथा,—
"ततः शशिध्वजो राजा युद्धादाहूय पुत्त्रकान् ।
सुशान्ताया मतिं बुद्धा रमां प्रादात् स कल्कये ॥
विशाखयूपभूपाश्च रुचिराश्वश्च संयुगम् ।
श्याकर्णादृपैश्चापि भल्लाटं पुरमाययुः ॥"
इति कल्किपुराणे २५ अध्यायः ॥

शशिप्रभं, क्ली, ( शशिनः प्रभेव प्रभा यस्य । ) कुमुदम् । इति शब्दमाला ॥ मुक्ता । इति राजनिर्घण्टः ॥ चन्द्रप्रभायुक्ते, त्रि ॥ (चन्द्रप्रभासदृशे च, त्रि । यथा महाभारते ।१।६६।४।
"तस्या वासः समुद्धूतं मारुतेन शशिप्रभम् ॥")

शशिप्रभा, स्त्री, ( शशिनः प्रभा । ) ज्योत्स्ना । इति जटाधरः ॥

शशिभूषणः, पुं, ( शशी भूषणं यस्य । ) शिवः । इति शशिशेखरशब्ददर्शनात् ॥

शशिलेखा, स्त्री, चन्द्रकला । गुडूची । वृत्तभेदः । इति मेदिनी ॥ तद्वृत्तस्य लक्षणादि यथा,—
"स्नौ मो यौ चेत् भवेतां सप्ताष्टकैश्चन्द्रलेखा ।
विच्छेदे ते मुरारे पाण्डुप्रकाशा कृशाङ्गी
म्लानच्छायं दुकूलं न भ्राजते बिभ्रती सा ।
राधाम्भोदस्य मध्ये लीना यथा चन्द्रलेखा
क्लिष्टासौ त्वां स्मरन्ती धत्ते ध्रुवं जीवयोगम् ॥"
इति छन्दोमञ्जरी ॥

शशिवाटिका, स्त्री, पुनर्नवा । इति राजनिर्घण्टः ॥

शशिशेखरः, पुं, ( शशी शेखरे यस्य । ) शिवः । इति हलायुधः ॥ ( यथा, कथासरित्सागरे । १ । २२ ।
"तस्याः स्तुतिवचो हृष्टस्तामङ्कमधिरोप्य सः ।
किन्ते प्रियं करोमीति बभाषे शशिशेखरः ॥")
बुद्धभेदः । तत्पर्य्यायः । हेरम्बः २ हेरुकः ३ चक्रसम्बरः ४ देवः ५ वज्रकपाली ६ निशुम्भी ७ वज्रटीकः ८ । इति त्रिकाण्डशेषः ॥

शशी, [न्] पुं, (शशोऽस्यास्तीति । शश + इनिः ।) चन्द्रः । यथा,—
'हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्द्रो हिमद्युतिः ॥'
भरतधृतशब्दार्णवः ॥
( यथा च हितोपदेशे ।
"शशिनस्तुल्यवंशोऽपि निर्द्धनः परिभूयते ॥")
अर्हद्व्रजाविशेषः । इति हेमचन्द्रः ॥

शशोर्णं, क्ली, ( शशस्य ऊर्णा । अभिधानात् क्लीवत्वम् । ) शशस्य लोम । इत्यमरः ॥

शश्वत्, व्य, ( शश + बाहुलकात् वत् । ) पुनःपुनः । इत्यमरः ॥ ( यथा, गीतायाम् । ६ । ३१ ।
"क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं निगच्छति ॥")

शष, वधे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् ।) शषति । इति दुर्गादासः ॥

शष्कुलः, पुं, छित्तिः । इति शब्दचन्द्रिका ॥ करकरमूचा इति भाषा ॥

शष्कुली, स्त्री, ( शष्कुल + गौरादित्वात् ङीष् । ) तिलतण्डुलमाषमिश्रितयवागूः । इति शब्दचन्द्रिका ॥ कर्णरन्ध्रम् । इति शब्दरत्नावली ॥ मत्स्यभेदः । सौरी । इति हिन्दी भाषा । अस्या गुणाः ।
"शष्कुली ग्राहिणी रुच्या मधुरा तुवरा स्मृता ।"
इति भावप्रकाशः ॥
( पिष्टकविशेषः । यथा, महाभारते । १२ । २२८ । ६२ ।
"पायसं कृसरं मांसमपूपानथ शष्कुलीः ॥" )

शष्पं, क्ली, ( शष हिंसायाम् + "खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः ।" उणा० ३ । २८ । इति षत्वं निपात्यते । ) बालतृणम् । इत्यमरः ॥ ( यथा, रघुवंशे । २ । २६ ।
"गङ्गाप्रपातान्तविरूढशष्पं
गौरीगुरोर्गह्वरमाविवेश ॥")

शस, उ वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्त्वावेट् । ) उ, शसित्वा शस्त्वा । इति दुर्गादासः ॥

शस, इ ङ आशिषि । आङ्पूर्व्वकोऽयम् । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) इ, आशंस्यते । ङ, आशंसते । आशीरिष्टार्थशंसनम् । इच्छायामित्यन्ये । इति दुर्गादासः ॥

शसनं, क्ली, ( शस + ल्युट् ।) यज्ञार्थपशुहननम् । इति शसनशब्दटीकायां रामाश्रमः ॥ (शस्यते हन्यतेऽत्र इत्यधिकरणे ल्युटि इत्याख्यानम् । यथा, ऋग्वेदे । १० । ८९ । १४ ।
"मित्रक्रुवो यच्छसने न गावः ।"
"शसने विशसनस्थाने ।"इति तद्भाष्ये सायणः ॥)

शस्कुली, स्त्री, पिष्टकविशेषः । पुली पिटा इति भाषा । (यथा, महाभारते । ७ । ६२ । ७ ।
"मोदकान् पूरिकापूपान् धानाधमकशस्कुलीः ॥" )
अस्या गुणाः ।
"पर्पटा लघवो रूक्षाः शस्कुल्यः कफपित्तलाः ॥"
काञ्जिकयुक्ततिलशस्कुली त्याज्या यथा,—
"मांसैरिक्षुविकारांश्च काञ्जिकैस्तिलशस्कुलीम् ।
मूलकं माषसूपेन मधुना च न भक्षयेत् ॥"
इति राजवल्लभः ॥ * ॥
तथा तद्भक्षणप्रायश्चित्तं यथा । वृथा पायसपूपशस्कुलीकृशरसंयावशिग्रुलोहितवृक्षनिर्य्यासामेध्यप्रभवाणां भक्षणे कामतस्त्र्यहोपवासः । अकामतस्तदर्द्धम् । क्षत्त्रियादीनां पादपादहानिः । इति प्रायश्चित्तविवेकः ॥

शंस, इ र शु स्तुतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, शंस्यते । नमध्यपाठेऽपि नस्य उपधात्वाभावात् लोपाभावे इदनुबन्धो वैदेषूच्चारणभेदार्थः । शु, शंस्ति । र, वैदिकः । इति दुर्गादासः ॥

शस्तं, क्ली, (शंस् + क्तः ।) कल्याणम् । इत्यमरः ॥ ( यथा, महाभारते । १३ । १० । ४२ ।
"लक्षयित्वा पुरोधास्तु बहुशस्तं नराधिपम् ॥")
शरीरम् । इति त्रिकाण्डशेषः ॥

शस्तः, त्रि, कल्याणयुक्तः । स्तुतः । इत्यमरः ॥ प्रशस्तः । इति मेदिनी ॥ ( यथा, भागवते । ३ । २६ । १५ ।
"क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥"
निहतः । यथा, महाभारते । ३ । ४० । ३ ।
"शक्राभिषिक्ते सुमहद्धनुर्ज्यातलनिस्वनम् ।
प्रगृह्य दानवाः शस्तास्त्वया क्षणेन च प्रभो ॥")

शस्तकं, क्ली, अङ्गुलित्राणम् । यथा,—
"अङ्गुलित्रं शस्तकञ्च तथा चाङ्गुष्ठरक्षकम् ॥"
इति शब्दरत्नावली ॥

शस्तकेशकः, त्रि, ( शस्ताः केशा यस्य कन् । ) प्रशस्तकेशयुक्तः । इति शब्दरत्नावली ॥

शस्त्रं, क्ली, ( शस्यते हिंस्यते अनेन । "अमिचिमिदिशसिभ्यः क्त्रः ।" उणा० ४ । १६३ । इति क्त्रः । यद्वा, "दाम्नीशसयुयुजेति ।" ३।२।१८२ । इति ष्ट्रन् । ) लोहम् । अस्त्रम् । इत्यमरः ॥ शस्त्रास्त्रैर्बहुधा युक्तैरित्यादिदर्शनात् शस्त्रास्त्रयोः कश्चिद्भेदमाह । येन करस्थेन हन्यते तत् शस्त्रं खड्गादि । येन क्षिप्तेन हन्यते तदस्त्रं काण्डादि । इति तट्टीकायां भरतः ॥ तत्पर्य्यायः ।
"अस्त्रे शस्त्रं प्रहरणमुद्घानो हेतिरायुधः ।"
इति शब्दरत्नावली ॥
"एकैकमस्त्रं शस्त्रञ्च देवैर्मुक्तं सहस्रधा ।
चिच्छेद लीलयैवेशो जगतां मधुसूदनः ॥"
इति विष्णुपुराणे ५ अंशे ३० अध्यायः ॥
अस्त्रं मन्त्राभिमन्त्रितम् । शस्त्रं तदितरत् । इति तट्टीका ॥ * ॥ राज्ञां शस्त्राचार्य्यो यथा,—
"यन्त्रयुक्ते पाणियुक्ते अयुक्ते युक्तधारिते ।
शस्त्राचार्य्यो निरुद्वेगः कुशलश्च विशिष्यते ॥"
तदगारनियुक्तस्य लक्षणं यथा,—
"स्थापनाजातितत्त्वज्ञः सततं प्रतिजागृता ।
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः ॥"
इति मात्स्ये १८९ अध्यायः ॥
शस्त्रचिकित्सा यथा । अथातोऽग्रोपहरणीयमध्यायं व्याख्यास्यामः । त्रिविधं कर्म्म । पूर्व्वकर्म्म प्रधानकर्म्म पश्चात्कर्म्मेति । तद्व्याधि प्रत्युपदेक्ष्यामः । अस्मिन् शास्त्रे शस्त्रकर्म्म